शास्त्री-III

Date 28-10-20
Page 2

उन्नतकालाद् यन्त्रजोन्नतांशसाधनम् :—

खाङ्कघ्नोन्नतघटिका दिनार्द्धभक्ता

भागाः स्युस्तदपमजांशकाः परघ्नाः

सिद्धाप्तानिगदितवत्ततो भुजांशा-

स्तत्काले स्युरिति च यन्त्रजोन्नतांशाः।

अन्वयः- खाङ्कघ्नोन्नतघटिकाः दिनार्द्धभक्ताः भागाः स्युः, तदपमजांशकाः परघ्नाः सिद्धाप्ताः ततः निगदितवत् भुजांशाः तत्काले यन्त्रजोन्नतांशाः स्युः।

तारा- खाङ्कघ्नोन्नतघटिकाः नवत्या गुणिता उन्नतघटिकाः, दिनार्द्धभक्ताः १६।३३ दिनार्द्धेन भाजिताः, भागाः अंशाः, स्युः, तदपमजांशकाः तेभ्यः ये अपमाः क्रान्तयः, ते परघ्नाः परसञ्ज्ञकैः गुणिताः, ततः, सिद्धाप्ताः चतुर्विंशतिसङ्ख्यया भक्ताः, ततः यल्लब्धं ततः च निगदितवत् पूर्वोक्त १४ श्लोकवत्, (ततो दलानि शोधयेत्) इत्यादिप्रकारेण, भुजांशाः, तत्काले तदानीं, यन्त्रजोन्नतांशाः एतन्नामकाः स्युः।

भावार्थः- उन्नतकाल की घड़ियों को ९० से गुणा करने पर जो गुणनफल मिले, उसमें दिनार्द्ध १६।३३ का भाग दें। जो अंशादि के रूप में लब्धि प्राप्त हो उसमें स्थूलक्रान्ति का साधन करके उसको पर से गुणा करें। जो गुणनफल मिले, उसमें २४ का भाग दें। जो लब्धि मिले, उसको स्थूलक्रान्ति समझकर उससे भुजांश साधन करें। वही भुजांश यन्त्रजोन्नतांश होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० म० वि० सुखसेना,
पूर्णियाँ।

अभीष्टयन्त्रजोन्नतांशेभ्य उन्नतकालसाधनप्रकारः —

अभिमतयन्त्रलवास्ततोऽपमोऽसौ
जिननिघ्न परहृततो भुजांशाः।
द्युदलघ्ना: खनवोद्धृता: कपाले
प्राक्पश्चाद्घटिका: क्रमाद् गतैष्याः॥

अन्वयः — अभिमतयन्त्रलवाः ततः अपमः असौ जिननिघ्नः परहृत ततः भुजांशाः द्युदलघ्नाः, खनवोद्धृताः प्राक्पश्चात्कपाले क्रमात् गतैष्याः घटिकाः स्युः।

तारा — अभिमतयन्त्रलवाः स्वेष्टयन्त्रोन्नतांशाः, ततस्तेभ्यो, यः अपमः क्रान्तिः, असौ जिननिघ्नः चतुर्विंशतिगुणितः, परहृत परसञ्ज्ञकसङ्ख्यया भक्तः, तस्य यः लब्धिः, ततः ये भुजांशाः स्युः ते, द्युदलघ्नाः दिनार्द्धेन गुणिताः, खनवोद्धृताः नवतिभक्ताः, क्रमेण प्राक्कपाले दिनगताः पश्चात्कपाले एष्याः, घटिकाः स्युः।

भावार्थः — अपने इष्टयन्त्रजोन्नतांश से स्थूलक्रान्ति का साधन कर उस संख्या को २४ से गुणा करें और गुणनफल में पर का भाग दें। जो लब्धि मिले, उसको अंशादि स्थूलक्रान्ति समझें। इससे भुजांश साधन करें। फिर उस भुजांश की संख्या को दिनार्द्ध से गुणा करें। गुणनफल में ९० का भाग दें। जो लब्धि हो वह घटिका आदि उन्नतकाल पूर्वकपाल में हो, तो गत और उत्तरकपाल में हो तो एष्य होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

इष्टकर्णतः-उन्नतकालसाधनप्रकारः—

तरणिनवरसाः श्रवोद्धृताः पराविहृता अपमो भवेत्ततः।
दिनदलगुणिता भुजांशका नवतिहृता अथवेष्टमुन्नतम्॥

अन्वयः— अथवा तरणिनवरसाः श्रवोद्धृताः पराविहृताः फलम् अपमः भवेत्। ततः भुजांशकाः दिनदलगुणिताः नवतिहृताः इष्टम् उन्नतं स्यात्।

तारा- अथवा प्रकारान्तरेण, तरणिनवरसाः ६९१२, श्रवोद्धृताः कर्णेन भक्ताः, ततः पराविहृताः परेण भाजिताः, फलं लब्धिः, अपमः क्रान्तिः, भवेत्। ततः अपमात्, भुजांशकाः दिनदलगुणिताः दिनार्द्धेन निघ्नाः, ततः, नवतिहृताः ९० भक्ताः, इष्टम अभीष्टम्, उन्नतम् इष्टोन्नतकालः स्यात्।

भावार्थः— तरणि सूर्य १२, नव ९ रस ६ = ६९१२ में अभीष्ट कर्ण का भाग देने पर जो लब्धि प्राप्त हो, उसमें फिर पर का भाग दें। जो लब्धि मिले, वह स्थूलक्रान्ति होती है। उसके बाद उस क्रान्ति से भुजांश साधन कर उनको दिनार्द्ध से गुणा करें। गुणनफल में ९० का भाग देने पर जो लब्धि हो, वह घटिकादि उन्नतकाल होता है।

डॉ० सुदिष्ट कुमार
सहा० प्राध्यापक (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ